Shri Raghunatha Temple MSS. Library,
JAMMU

No. १२०० घ

Title अध्यात्मविद्योपदेशविधिः

Author श्रीशङ्कराचार्यः

Extent २८ पत्राणि Age

Subject वेदान्त शास्त्रम्

अध्यात्मविद्योपदेशविधिः

१२०९

28

श्रीरामजी ॐ

श्री

श्रीकृष्णप्रसन्न

।।श्री।।
राम

।।ईती आध्यात्म विद्योपदेश विधिं भ्रं रं स्मा॥ः

जयराम

सीताराम

२

२२२२

अ॰वि॰ ॥श्रीगणेशायनमः॥अथाध्यात्मविद्योपदेशविधिर्लिख्यते॥सच्चिदानं
नंदरूपायसर्वधीवृत्तिसाक्षिणे॥नमोवेदांतवेद्यायब्रह्मणेनंतरू
॥१॥ पिणे॥यदज्ञानादिदंभाति यज्ज्ञानाद्विनिवर्तते॥नमस्तस्मैचिदानं
दवपुषेपरमात्मने॥अथाध्यात्मविद्योपदेशविधिंव्याख्यास्यामः
॥अध्यात्मविद्याधिकारिणमाह॥तपोभिःक्षीणपापानांशांता
नांवीतरागिणांमुमुक्षूणामपेक्षोयमात्मबोधोविधीयते॥अना ॥१॥
त्मभूतेदेहादावात्मबुद्धिस्तुदेहिनां॥साविद्यातत्कृतोबंधस्तं
नाशोमोक्षउच्यते॥अनादिःसांतनैसर्गिकोध्यासमिथ्याप्र
त्ययरूपःसर्वलोकप्रसिद्धः॥अस्यानर्थहेतोःप्रशमनंआत्मैक

वक्तारंशिष्यःगुरुंपरिपृच्छति॥भोभगवन्॥सआत्माकीदृशः॥
तच्छृणु॥सच्चिदानंदाद्वितीयमखंडमचलमजमक्रियंकूटस्थम
नंतंस्वप्रकाशंब्रह्मसआत्मा॥भोभगवन्॥तर्हिदीर्घेस्मिन्सं ॥श्री॥०
सारेसंसृतिःकस्यतस्यैवंस्वभावोवानैमित्तिकं॥यदिईदृशःस्व
॥५॰ भावस्तर्हिअवर्जनीयत्वात्॥ममम्मोक्षाशानास्ति॥नहिवस्त
नैमित्तिकं॥तर्हिकिंनिमित्तं॥वत्सावधानमतिश्शृणु॥स्वाश्र
यास्वविषयास्वानुभवगम्यास्वमायाअवस्तुअनिर्वाच्या
विद्यास्ति॥सात्वदाश्रयत्वविषयत्वबलेनचित्सदानंदाद्वि
तीयस्वभावमावृणोति॥यथागर्भागारांधकारेणआ

गारगर्भमाधायाप्यमिव ॥ अहं ब्रह्म न मनुष्योहमिति वि
शिष्य प्रतिगततत्त्वस्य अप्रत्यात्मनि देहादौ अप्रात्मत्वेनाभि
२ मन्यमानो प्राप्ताशेषपुरुषार्थोपि प्राप्ताशेषानर्थः
॥ अविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टनिवृत्तिं
ह दित्स्याकांक्ष्यत्स लौकिकवैदिकस्वाभाविकानुष्ठितैरपि वि २
षयसुखार्थं मोक्षाकांक्षामलभमानोनन्तवालांबुवल्ग
मकरादिभिरिव रागद्वेषादिभिरितस्ततश्चाकृष्यमाणः सुरन
रतिर्यगादिविभेदभिन्नासु नानायोनिषु परिवर्तमानो मो
हेन मोमुह्यमानः संसरति ॥ तथा च श्रुतिः ॥ नं तं विदाथ

यइमाजजानान्यद्युष्माकमंतरंबभूव॥नीहारेणप्रावृताजल्प्या
चासुतृपउक्थशासश्चरंति॥स्मृतिश्च॥पुरुषःप्रकृतिस्थोहिभुंक्तेप्र
कृतिजान्गुणान्॥कारणंगुणसंगोस्यसदसद्योनिजन्मसु॥स्वामिन्यु
श्र ष्मद्वचनंसमंजसमिवभाति॥कथंइथं॥कूटस्थचिद्घनैकरसस्यात्मनःशशवि
षाणसदृशाविद्यावरणविक्षेपरूपंकथंसंभाव्यते॥मृगनारविंदमसत
स्यसुरभित्वंकुतः॥आस्तांअसंभावनीया॥साधुसाधुमरेच्चात्मन्॥विवेकभ्र
ममात्रसिद्धं॥भोभगवन्॥इदंभ्रममात्रसिद्धंतर्हिकिंसत्यं॥यथाइंद्रजालंपश्यतिज
नःव्याघ्रजलउरगादिसत्यतयानप्रतिभातिकिं॥इंद्रजालेभ्रमनिवृत्तेसर्वंमिथ्ये
तिइदंतुसर्वेषामनुभवसिद्धं॥यथारज्ज्वामहिभ्रमनिवृत्तेरज्जुरेवसर्पइतिना
न्यत्किंचिदपितथाअविवेकभ्रमनिवृत्तेतदनंतरंसर्वंमिथ्येतिज्ञायतेइदंतु
सर्वेषामनुभवसिद्धं॥भोभगवन्तर्हिअस्यभ्रमस्यनिवृत्तिःकथं॥तच्छृणु॥
अकस्मात्कथंचित्पुण्यवशाद्वेदोदितनेश्वरार्थंकर्मानुष्ठानेनापगत

3

रागादिमलः ॥ अनित्यादिदर्शनइहामुत्रार्थफलभोगविरागः ॥ वेदांतवेद्यं
प्रतीयमानं ब्रह्मात्मभावं बुभुत्सुः ॥ आत्मानं ज्ञातुमिच्छति ॥ ज्ञानादे
वतु कैवल्यमिति श्रुतेः ॥ ज्ञानं तु श्रवणमननेन निदिध्यासनमंतरेण न संभ
वति ॥ तथा च श्रुतिः ॥ आत्मा वा रे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्या
सितव्य इत्यादि ॥ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां ॥ श्रुत्याविंयते भिधी
यस्मादन्यथा पतितो भवेत् ॥ तस्मादाचार्यात् ब्रह्मात्मज्ञानप्राप्तिः
॥ कथमाचार्याद्ब्रह्मात्मज्ञानप्राप्तिः ॥ यदि प्रथमं अज्ञानः शिष्यः त
स्य ब्रह्मात्मैकत्वज्ञानोपदेशं कुर्यात् ॥ अथ विज्ञः ॥ तदा ब्रह्मात्म
ज्ञानेन ब्रह्मैव भवति ॥ ततश्च अज्ञानतत्कार्यदेहद्वयनिवृत्तेः
॥ तदा देहादिसंबंधाभावात् न शिष्यादिशासनमुपपद्यते ॥ अथा
नवगतभावस्यात् ॥ तस्माद्देहादिसंबंधोगीकर्तव्योभ्युपेतव्य इति

नेदुःखाभावात्॥१॥रेतो मुख्यमुदकं गर्भोत्पत्तिः शुभ्रवर्णं च॥पित्तं ते
जः उष्णत्वात्॥स्वेदो वायुः श्रमद्रवसंगत्वात्॥लालाकाशं ऊर्ध्वा
दागमनात्॥रक्तं पृथिवि लोहितत्वात्॥२॥क्षुधा मुख्योग्निः पच
नसामर्थ्यत्वात्॥ग्रसंत्रत्वात्॥तृषा वायुः कंठोष्ठशोषणत्वात्॥
निद्राकाशं शून्यस्वभावात्॥कांतिरुदकं शीतोष्ठसंबंधात् रक्त
लोहितं भवंति॥आलस्यं पृथिवी जाड्यत्वात्॥३॥धावनं मुख्यो वा
युः सबलत्वात्॥प्रसारणं आकाशं व्यापकत्वात्॥उत्क्रमणं ते
जः उत्क्रष्ठव्यापरत्वात्॥चलनमुदकं शिथिलत्वात् द्रवत्वात्॥सं
कोचनं पृथिवि जाड्यत्वात्॥४॥शिरसि अवकाशं मुख्याकाशं अ
नाहतशब्दस्थानत्वात्॥कंठे अवकाशं वायुः मुखनासिकयोः

त्ति॥तथाश्रुत्वावधारितस्यतत्त्वंब्रह्मेतिमहावाक्यार्थस्यतात्पर्यंगुरुः
युक्त्याप्रतिबोधयति॥चित्तदानंदरूपत्वंतदासंभावयति॥भोभग
वन्॥साशोधनयुक्तिःकथं॥अरेशिष्यइदंशरीरंदृश्यंजन्मनियममं
गलंत्वंनभवसि॥भोभगवन्॥दृश्यंजडमनित्यममंगलंकथं॥इत्थं
॥तच्छरीरोत्पत्तेःप्रागेतच्छरीरंतवनास्ति॥यतइदंशरीरंत्वंनभव
सि॥एतच्छरीरनाशादूर्ध्वंएतच्छरीरंत्वंनभेसि॥आदावंतेच
यतइदंशरीरंतवनास्ति॥अतइदंशरीरंत्वंनभवसि॥अतोवर्तमा
नोपिइदंदृश्यंशरीरंत्वंनभवसि॥किंचममइदमितिशरीरंप्रतीयते
अतस्त्वंतत्काशाद्भिन्नत्वंद्रष्टाइदंतवदृश्यंशरीरंत्वंनभवसि॥यथादा

श्री

श्रीगणेशायनमः रेरेवानरकोभवांनहमेरत्वछुनहं गन
देउ तोहं खरखउनस्यजगतांकोदं उदिक्षा ये हमपोदंउ
पाटपाटनिचिधौ कोवात्रिकूटाचलाकोमेरू कचराव
णस्यमणपकोटस्याकूटायते ।।१२

श्रीमत

श्रीमत

श्रीकमलाकान्त

श्रीमतवज

।। श्रीगजाननप्रसन्न ८ —

श्रीमितवज

रामसीता

तारामू श्रीरामू जयरामसीतारामू

५

स प्रकाश्यकाष्ठाद्व्यतिरिक्तो दाहकः प्रकाशकोग्निः॥ तथा दृश्याद् दे
हात् द्रष्टा त्वं व्यतिरिक्त इति सिद्धं॥ अन्यच्च॥ स्वप्नांते दिव्यशरीर
भेदमास्थाय तदुचितान् भोगान् भुंजान्येव प्रतिबुद्धो मनु
ष्यशरीरं आत्मानं पश्यं नाहं देवो मनुष्य एवेति देवशरीरे बा
ध्यमाने पि अहं मा स्पंदं न बाध्यमानं॥ अतस्त्वं शरीरा
भिन्न एवस्य च प्रमरणादौ दर्शनात्॥ अपि च॥ योहं कौमारे ना
नाक्रीडामनुभवन् सोहं स्थविरेण मुनिवद्रतिं खितयेवं वदसि॥
तदा स्थविरकुमारशरीरद्वयं तस्य व्यवहारस्य त्वं द्रष्टा इ
दं तव दृश्यं शरीरं त्वं न भवासि॥ द्रष्टा दृश्यादन्य इति प्रसिद्धो न्या
यः॥ लोके दृश्यते घटादिवत्॥ यथा घटादयो रूपादिमंतश्चक्षु

रादिभिः करणैरुपलभ्यंते ॥ यत्त इदं शरीरं तत् दृश्यं त्वं द्रष्टा इति
सिद्धं ॥ अपिच ॥ जडत्वं प्रदर्शयति ॥ पंचीकृतपंचमहाभूतानि
न तमेव ज्ञानासितानि स्वात्मानं न जानंति परमपि न जानंति अस्तंत
जडानि ॥ तानि त्वं न भवसि ॥ तदंशोद्भवमिदं शरीरमपि त्वं न भवसी
॥ स्वामिन् ॥ तदंशोद्भवमिदं शरीरं कथं ॥ इत्थं ॥ यत्काठिन्यं सा पृथि
वी ॥ यद्द्रवत्वं तदापः ॥ यदुष्णत्वं तत्तेजः ॥ यत्संचरति स वायुः ॥ यत्सुषिरं त
दाकाशमिति ॥ एतस्तानि सर्वाणि भूतान्यस्मिन्छरीरे दृश्यंते ॥ ता
नि सूक्ष्माणि अस्थिमांसप्रभृतीनि पंचविंशतिगुणानि पंच महाभूतानि
तेषां समूह एवेदं शरीरं जडं त्वं न भवसि ॥ भो भगवन् ॥ स्थूलशरीरे पंच महा
भूतानि पंचीकृतानि श्रूयंते दृश्यंते तानि कानि पंचविंशतिगुणानि उच्यं
ते ॥ अस्थिमांसस्नायुत्वक्रोमाणि एवं पृथिवी पंचधा भवति ॥ रेतोपि
मा त्त स्वेद लाला रक्तं एवमापः पंचधा भवंति ॥ क्षुधा तृषा निद्रा कांसा

तस्यैवं तेजः पंचधा भवति ॥ धावनप्रसारणोत्क्रमणप्रचलनसं
कोचनमेवं वायुः पंचधा भवति ॥ शिरःकंठहृदयोदरकट्येवमाका
शः पंचधा भवति ॥ भयं पृथिवी ॥ मोहमुदकं ॥ क्रोधोग्निः ॥ कामोवा
युः ॥ लोभआकाशमिति मतांतरे ॥ भो भगवन् ॥ एकैकं भूतं पंच
धा किमिति चेत् उच्यते ॥ परस्परानुप्रवेशात् पंचीकरणं ॥ द्विधा रा ।
विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वितीयांशैर्योजना
त्पंच पंच चेति ॥ भो भगवन् ॥ कस्य भूतस्य को वांशः कस्मिन्भूतेव्व
विष्ठ्याः का स्थितिः ॥ उच्यते ॥ अस्थिमुख्या पृथिवी विच्यारबलात्
॥ काठिण्यं पीतवर्णं च ॥ मांसमुदकं सद्रववात् ॥ स्नायुस्तेजः उष्ण
त्वस्य प्रतिक्षीणत्वात् ॥ त्वग्वायुः स्पर्शधर्मत्वात् ॥ रोमाकाशं छेद

तत्वज्ञानादज्ञानतत्कार्यनिवृत्तिः ॥ तस्मादाचार्याधीनं ज्ञानमपेक्ष्यत इति ॥
भो भगवन्नू ॥ द्वैते सति शिष्यशासनं संभवति ॥ ब्रह्मा ज्ञाने जाते सति
द्वैताभावत्वच्छिष्यशासनं कथं स्यात् ॥ अत्र नायं दोषो ज्ञानिनः ॥
ब्रह्मात्मज्ञाने जाते तेन बाधितस्यापि प्रारब्धस्य फलं तस्य कर्मणो
बाधितं ॥ अत एव ज्ञानिनस्तु प्रारब्धवशाद्देहादि प्रतिभास्यते ग
॥ अथावगतब्रह्मात्मज्ञानं संप्रदायक्रमेणाउपदिश्यते ॥ तस्मादाचा
र्याधीनं ज्ञानं ज्ञानान्मोक्ष इति सिद्धं ॥ तस्माद्वेदोक्तशमदमादिसा
धनचतुष्टयसंपन्नो ब्रह्मविदमाचार्यमुपेत्य साष्टांगदण्डिपातं कृ
त्वा समित्पाणिः पुरतोपवेश्य विज्ञापयति ॥ तथा च श्रुतिः ॥ समि

साधिः श्रोत्रीयं ब्रह्मनिष्ठं गुरुं तत्वज्ञानार्थमभि भिगछेत्॥ भो
भगवन्॥ संसारतापत्रयार्कसंतप्तोहं अस्य तापस्य निवृ
२ त्तिं कुरु ममेति विज्ञापितः सन् गुरुरुपदिशति॥ कथं इत्थं
गतेव ब्रह्मात्मैकत्वभावे ज्ञाने जाते संसारनिवृत्तिर्भविष्य ५
१ ति॥ नान्यथा॥ भो भगवन्॥ न केन भवति॥ तच्छृणु॥ आदौ त्वं
पदशोधनेन जीवत्वं निरस्यसि॥ शुद्धो भविष्यसि तदा ब्रह्मा
त्मैकत्वभावो भवति॥ यथा ग्रामादिस्थितो चंदनवृक्षः श्री
ते स्याप्य संभावना भवत्येवनेह चंदनमिति॥ अन्यो तदभि
ज्ञोयुतया प्रतिबोधयति॥ कटुकसुगंधिशीलत्वं चंदनमि

अवकाशस्याग्निः सदा उष्णास्थितिः ॥ उदरअवकाशं जलं जलाशय
वात् ॥ कटि अवकाशं पृथिवि गंधस्थानत्वात् ॥ ५ ॥ एवं समूहात्मकं जडं
सन्न भवसि ॥ भोगवन् ॥ सुखदुःखे जानन् कथं शरीरं जडं ॥ एतन्न छुणु ॥
देहो न जानाति सुखदुःखे यैतो भौतिको दृढ जडश्च ॥ भूतानि कदापि न
जानंति ॥ तद्दशाओपि न जानंति अतस्तद्दशसंघातो देहः कथं जानी
यात् ॥ अपिच देहः सन्नपि उष्ठितं पतितं वा न जानाति ॥ सुषुप्तौ चौरे
गृह प्रविश्यापहृत्य आभूरणानि गत इति न जानाति अतो सुतंजडः ॥
घटो यथा दृश्यो जडश्चेति तथा देह इति ॥ ननु घटो जातस्तथैव तिष्ठति
देहस्तु वर्द्धते अतो घटवद्देहो वक्तुं न शक्यते ॥ इति पृथ्व्या मुरस्य पदिश ॥

ति॥वृद्धिमानिति देहः किं चैतन्यं भवति॥वृद्धित्वमपि चैतन्ये नास्ति॥एवं तया
कुत्र दृष्टं केनोक्तं॥अतः दृष्टांतान् परिहरति॥यथा तृण गोमयं चयत्र
निक्षिप्यते स राशिः किं चैतन्यं भवति॥किं च घटियंत्रे वालुका किं चैतन्यं
१० भवति॥किं च कूपे उद्धीर्यमाणा मृद्धि वर्द्धमाना तीरे किं चैतन्यं भवति॥
किं च कुड्यादि निमित्रा मुहुर्मुहुर्निक्षिप्यमाणा मृद्धि वर्द्धमाना बोद
कायां किं चैतन्यं भवति॥एवं प्रतिदिनं अन्नरूपेण संवर्द्धमानो देहरू
पो मृत्संचय अन्यकृत् वर्द्धमानोपि च यंत जड एव॥अतस्त्वं जडेन
भवसि॥त्वं तु चैतन्यमेव॥अनियतत्वं प्रदर्शयति॥आकाशमवका
शं भवतु मिच्छति॥पवनो धावनमेव यतते॥अग्निर्ज्वलितुमे १०
वेच्छते॥उदकं द्रवितुं जिगमिषति॥पृथ्वी विशीर्णा भवितु

मिछति॥एवं सर्वाणिभूतानि स्वस्वमार्गमभिगंतुमिछंति॥अतःशरी
रस्यानियता विनिश्चिता॥अमंगलं तं प्रदर्शयति॥जन्म कार्ये परा
मृश्यमाणो देहो मलादयंतो शुद्ध एव॥एतेन तःसर्वो गोमल भाज
ने निघंनो देहः॥मलादयंता शुद्ध एव ~~[illegible] गोमल भाजने~~
~~निघंनो देहो मलादयंतो शुद्ध एव~~॥अतः दशदोषदुष्टो देहः॥त्वं नभ
वसीति सिद्धं॥भो भगवन्॥केते दोषादश॥तछृणु॥अशुद्धं॥१॥
अशौचं॥२॥दुर्गंधि॥३॥अस्थिरं॥४॥तुत्वरवडं॥५॥दग्धं॥६॥शिथिलं॥
७॥नानारोगग्रस्तं॥८॥अध्रुवं॥९॥आमिषं॥१०॥अतो हेतोः स्थूलश
रीरं त्वं न भवसि॥एतत्सत्यं॥भो भगवन्॥इदं स्थूलशरीरमहं न भवा
मि एतावता मम किं जातं हितं॥साधु साधु अरे सावधानमना

श्रृणु॥यदाइदंशरीरंत्वंनभवसितदाअनित्यजातिवर्णाश्रमश्चत्वंनभव
सि॥षड्भावविकारस्तवनास्ति॥जायतेऽस्तिवर्द्धतेविपरिणमतेऽप
क्षीयतेविनश्यतीति॥वर्णधर्माश्रमाचरःशास्त्रयंत्रेणयोजितः॥
निर्गतोसिजगज्जालात्पंजरादिवकेसरीति॥वर्णाश्रमधर्मो
पितवनास्त्येव॥यतःशास्त्रमाह॥वर्णाश्रमाभिमानेनश्रुते
११ र्दासोभवेन्नरः॥वर्णाश्रमविहीनश्चवर्त्ततेश्रुतिमूर्धनि॥या ११
वद्देहात्मविज्ञानंबाध्यतेनप्रमाणतः॥प्रामाण्यंकर्मशास्त्रा
णांतावद्देह्युपपद्यतइति॥अहंदेहोनभवामिइतियदाज्ञा
नंजातंतदासर्वकर्तृत्वमपितवनास्ति॥भोभगवन्इदंस्थूल
शरीरमहंनभवामितदाज्ञयाज्ञातं॥स्थूलशरीरसंबंधाभा

वात्॥ वर्णाश्रमकुलदेवतागोत्रजातिस्त्रीपुरुषनपुंसकस्थूलह्रस्वदी
र्घश्यामगौरादिनामरूपषड्भावविकारधर्माधर्मादिममनास्त्येव
॥ तवकृपाकटाक्षान्निरीक्षणात्सम्यग्मयाज्ञातं॥ अन्यच्च॥ भोभ
गवन्॥ इंद्रियाणामभावे शरीरचलनाभावात्॥ काणोहं बधिरो
हमित्याद्यनुभवाच्च॥ इंद्रियाण्यहमिति पृष्ठे॥ गुरुराह॥ त्वंन
भवसि॥ कथंइत्थं॥ तद्भूतकार्यमेव॥ भोभगवन्॥ कस्यभूत
स्य किं कार्यमुच्यते॥ नभसः सकाशाच्छ्रोत्रवाचौदिकरणे स
मुत्पन्ने॥ वायोः सकाशात्त्वक्पाणीदिकरणे समुत्पन्ने॥ तेजसः
सकाशाच्चक्षुः पादौदिकरणे समुत्पन्ने॥ उदकासकाशाद्रसनो

पस्थेद्विकरणे समुत्पन्ने ।। पृथिव्याः सकाशात् घ्राणपायू द्वि करणे
समुत्पन्ने ।। पंचांशेन सह मनो जातं बुद्धिर्मनो विशेषएव ।। एतदे
व विचक्षणोमि ।। वाक् श्रोत्रे आकाशकार्य एव विचार्य प्राधान्येस
१२ ति शब्दाभिव्यंजकत्वात् ।। प्रायेण शब्दोत्पत्तिर्वा ।। हस्तकपाणी
वायुविकारो स्पर्शग्रहणसाधनत्वात् ।। स्पर्शवदेव द्रव्यस्य १२
हस्तेनोपादातुं शक्यत्वात् ।। चक्षुःपादौ तेजोविकारौ रू
पस्य ग्राहकत्वात् ।। प्रायेणोष्णत्वं पादयोः ।। उपस्थजिह्वे उद
कविकारौ एकरसग्राहकत्वात् स्निग्धत्वात् येनोपस्थव्या
नंदत्वात् ।। घ्राणपायू पार्थिवे गंधग्राहकत्वात् गंधस्थानत्वात्

बुद्धिमनोविशेषः॥ काचकूपारकवत॥ पंचप्राणवृत्तिवायुवि
कारएव॥ तदात्मकत्वेनोपलभ्यमानत्वात्॥ एवंभूतानिजडा
नि॥ तद्देशसंयोगादिंद्रियाणिजडानि॥ भोभगवन्॥ स्वस्ववि
षयंजानंतिकथंइंद्रियाणिजडानि॥ तच्छृणु॥ श्रोत्रमात्मानंनजा
नाति॥ परमपिनजानाति॥ स्वस्वविषयंशब्दंज्ञातुंनेष्टं अन्यविष
यमपिज्ञातुंनसमर्थंउभयथाजडं॥ किंतु शब्दज्ञानकरणसाध
नमित्यर्थः॥ दीपवत्॥ यथादीपोरूपादिज्ञानसाधनं॥ यथादी
पेनरूपादिंगृह्यते॥ तथाश्रोत्रेणशब्दमिति॥ एवमितराण्युपक
रणानि कर्मेंद्रियाणि क्रियासाधनान्येवयथादर्विवत् अस्यतजडानि
॥ त्वंनभवसीतिविसिद्धं त्वंतुज्ञाननेव॥ भोभगवन्॥ प्राणेसतिदेहस्थे

र्त्तेइंद्रियांण्यपिचेष्टंते प्राणेगतेसतिदेहश्चेष्टाहीनोभवति॥ इंद्रि
याण्यपितादृशानिभवंति अहंक्षुधावान् पिपासावान् ईसा
द्यनुभवाच्च॥ अतः प्राण एवाहं॥ हैनभवसि॥ कथं इथं॥ चैत
13 न्याभावात्॥ सुषुप्तौस्वप्ने वा॥ उच्छ्वासनिश्वासरूपेणप्रवर्त्तमा
१३॥ नोप्ययमंतर्बहिश्चनजानाति॥ चौरोगेहेप्रविश्यपदार्थान्भू
षणानि गच्छति सतदानजानाति अतोयंतजडएव प्राणा
दयः देहवदेव॥ अपिच॥ एकस्मिन् पर्यंके शयनेस्वस्त्रियं स्वपु
रुषेस्थितेसतिकश्चिज्जारआगत्यस्त्रियासहभूषणानि
परिहृत्यगच्छतिसतिइथंनकर्त्तव्यमितियत्नोननिवारयति
अतोयंतजडः प्रबुद्धोजानातिइतिचेन्न॥ सर्वावस्थासुउद्बु १३॥

सनिश्चास्वरूपेणास्यो परतिर्नरस्येव॥स्थितावाप्यसौनजानाति॥क
थंइथं॥इदानींकस्मिन्भागेश्वासोवर्त्तते इति पृष्टोपिअस्मि
न्भागेअहंवर्ततेइति भ्रान्तिबुध्येनजानाति॥अतस्थितावपिनजाना
॥उच्यते॥जउपिजउश्चेष्टाणः॥कथंजउंशरीरंचेष्ट्यति
तः॥गृहाच्छादनपूर्णशाखावृक्षं अन्यत्रपातयन्ति॥जउश्यास्यय
मेवस्वभावः॥नैतावतालाभवति॥प्राणश्चस्वचेष्टानस्वतंत्रा
कर्माधिनैव॥कथंइथं॥आगस्थितिनिमित्तंकर्मोद्भूतंभववलित
रपेक्षयासर्वाणिकर्माणिकरणानिगृहीत्वाबुध्युपाधिसंपर्क
जनितविज्ञानेनसहस्वप्नंसुषुप्तिंवागच्छेत॥एवंस्थानत्रयेनव

रतं गच्छति ॥ कर्मनिमित्तं चेष्टागमनागमनं प्राणोपि तत्कर्मवशादेव
शरीरं परिपालयन्वर्त्तते ॥ अन्यस्यापि व्याख्यानादिव्यापारस्ये
ष्टां कर्तुं न समर्थः ॥ अतः जडा एव प्राणादयः ॥ एवं समूहात्मकं सप्तदश
भो कं लिंगं शरीरं त्वं न भवसि इति सिद्धमभूत् ॥ भो भगवन्नाम नेसि स्वस्वच्छेस
१४ न्ति पश्यति शृणोति अहं संकल्पवान् विकल्पवान् इत्याद्यनुभवाच्च ॥
॥१२॥ ॥ मनो व्यग्रेण पश्यति न शृणोति ॥ अतो मन एवाहं ॥ त्वं न भवसि ॥
॥ इदानीमेव मनोऽन्यत्र द्रव्याणि स्थिरीभूतं पश्यति ॥ उभयवृत्तियो
र्वेति सम नो न भवति ॥ मनसः सकाशात् तद्वृत्त्या भिन्न एव ॥ अ
पि च ॥ यन्मनः सा बुद्धिरित्युच्यमाने प्रतिक्षणं विलक्षणे आ
युगपद्भावनियंतयोरेकस्य नाशोऽप्यान्यो मतिः ॥ मनः उत्पत्तिम १४
द्विनाशवत् ॥ सुषुप्तावभावादिति नैवानुभवः ॥ अत्र श्रुति

रपि॥ आत्मनो मनो जातं तत्रैव विलीयते इति॥ अतः मनस्त्वं न
भव[illegible]सीतसिद्धं[illegible]॥ एवमिंद्रियसमूहात्मकं सप्तदशाकं लिं
गशरीरं त्वं न भवसीति सिद्धं॥ भो भगवन् एत[illegible] सत्यं॥ लिंगशरीरमहं
न भवामि अनेन ज्ञानेन मम को लाभो भविष्यति॥ अरे सावधान मति
॥ श्शृणु॥ यदा लिंगशरीरं त्वं न भवसि तदा गमनागमने स्वर्गनरकादिभोगोपि
तव नास्त्येव॥ अपि च॥ प्रारब्धकर्मफलभोगोपि तव नास्त्येव॥
भो भगवन्॥ तत्कथं इत्थं॥ देहो भोगायतनं विषया भोग्याः॥ इं
द्रियाणि भोगसाधनानि॥ मनोबुद्धि भोक्ता॥ एवं भोक्तृभोगाय
तनं भोग्यसाधनानि एतत् च तुच्छ पं त्वं न भवसि॥ तस्मादारंभ कर्मफ
भोग लभोगस्तव नास्त्येव॥ भो भगवन्॥ जाग्रत्स्वप्ने सुखदुःखमहं ज्ञा

नुभवन्न॥ कथं सुखदुःखममनास्तीति इति अनुभवः॥ तच्छृणु॥ अरेशरीर
गतचक्षुःश्रोत्रोदरवेदनादयः सुषुप्तावस्थामापन्नस्य बुद्धिरहितस्य ल
वनप्रतीयंते॥ अतस्ते तत्र धर्मा न भवंति॥ क्षेत्रस्यैव ते विमन्यंते॥ मू
१५ द्धयथाजलस्थचंद्रे॥ यतः शास्त्रमाह॥ न ह वा सशरीरस्य प्रिया
प्रिययोरपहतिः॥ अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति
॥श्रुतिः॥ च॥ कामः संकल्पो विचिकित्साश्रद्धाश्रद्धा धृतिरधृतिर्
ह्रीर्धीर्भीरित्येतत्सर्वं मन एव॥ अत्र भगवद्वचनं॥ इच्छा द्वेषः सुखं १५॥
दुःखं संघातश्चेतना धृतिः॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतं॥
स्मृतिरपि॥ रागेच्छा सुखदुःखादि बुद्धौ सत्यां प्रवर्तते॥ सुषुप्तौ
नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः॥ अंतःकरणधर्मा इत्य
र्थः॥ श्रुतिस्मृतिगुरुस्वानुभवात् लिंगशरीरमहं न भवामिति

यदा ज्ञानं जातं तदा नानायोनिभ्रमणभ्रंशः ॥ नवगुणरहितो भवसि
॥ स्वामिन् ॥ ते नवगुणाः के ॥ बुद्धिरागप्रयत्नचेष्टासंस्कारधर्माधि
र्मसुखदुःखानीति ॥ भो भगवन् ॥ अंतःकरणे बाह्ये करणे अपि श्च
अनुसंधानतो देहोहं न भवामि ॥ इंद्रियाण्यहं न भवामि ॥ एतत्त
त्वस्यानुसंधानमहं जानामि ॥ मामहं न जानामीति भ्रमाच्चि
॥-१० त्तं अतः कोहं देहीति निःसंदेहं भ्रांतिनिरासं कुरु ममेति वि
ज्ञापितः सन् गुरुरुपदिशति ॥ तत्कथं इत्थं ॥ इदं सर्वं दृश्यं
पृथक् पृथक् स्वरूपं त्वं जानासि आत्मानमेव न जानासि इति
वदसि एतदेव तवाज्ञानं इदमेव कारणशरीरं ॥ अस्याश्र
यस्त्वमेव ॥ किं न जानासि इति तव कारणशरीरमव्याकृत

मज्ञानसंज्ञिकमस्ति॥त्वमेवकथंइत्थं॥तदन्यःकोपिनजा
नातिइतित्वमेववदसिमामहंनजानामीति॥अस्यज्ञा
नस्यत्वमेवाश्रयः॥अज्ञानभ्रमंचत्वंसम्यक्वेत्सि॥अत
स्त्वंजडेनभवसि॥वेद्यवेत्तातु॥अतस्त्वंज्ञानंतस्या
१९॥ ज्ञानस्याश्रयः॥किंज्ञानंतदज्ञानाज्ञानमपित्वमेव॥
॥ त्वयिस्थितमज्ञानंयतोजानासिअतस्तस्यपृथ
क्साक्षी॥तवदृश्यमानंत्वंनभवसि॥स्थूलंनसूक्ष्म
शरीरवत्॥अतःकारणशरीराद्भिन्नस्त्वं॥एवमाश्र
यविलक्षणज्ञानमात्रसाक्षीस्वरूपस्त्वं॥एवंसतिमाका १९॥
हमितिवदसि॥ततःनिःसंशयंशृणु॥इंद्रियाणिसवा

त्मानं स्वस्थितिं च न जानंति परस्परमपि न जानंति॥ अतः
जडानि॥ त्वं तु इंद्रियाणि इंद्रियस्थितिं च सदा जानासि॥
मनः स्वात्मानं न जानाति॥ परस्परं बुध्यादिव्यापारक
र्तुं न समर्थं॥ अतः जडं॥ त्वं तु मनोबुध्यादीनि सदा जाना
सि॥ अतस्त्वं तत्वस्वरूपं ज्ञानमेव॥ यथा राहोः शिरः शि
र एव राहुः॥ तथा ज्ञानमेव त्वं॥ तथा च श्रुतिः॥ येन वा
पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन
वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजाना
ति तद्विज्ञानं ब्रह्मणो वेति विश्वं न च तस्यास्ति वेत्ता
॥ तमाहुरग्र्यं पुरुषं पुराणं यस्य भासा सर्वमिदं विभा

ति॥स्मृतिरपि॥इंद्रियाणि पराण्याहुरिंद्रियेभ्यः प
रं मनः॥मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु
सः॥ज्ञानमात्रत्वमिति भावः॥अथ विधिमुखे
१७॥ न प्रबोधयति॥यतो ज्ञप्तिमात्रस्वरूपत्वं॥अतस्तत्राज्ञानं १७॥
नास्ति॥यथा सूर्ये तमः॥अतस्तस्याज्ञानस्य निवर्तकं ज्ञानमपि
17 तत्र नास्ति॥ज्ञानस्वरूपत्वात्॥यथा दीपस्यान्यदीपेक्षा नास्त्येव
प्रकाशस्वरूपत्वात्॥तस्मादज्ञानज्ञानोद्भवौ बंधमोक्षावपि तत्र
नस्तः॥अतो नित्यमुक्त एव त्वं॥यतः शास्त्रमाह॥अनात्मन्यात्मधी
बंधस्तन्नाशो मोक्ष उच्यते॥बंधमोक्षौ न विद्येते नित्य
मुक्तस्य चात्मनः॥अयं तस्मात्चिद्रूपः॥१॥सद्रूपत्वं च दृ

र्शयति॥ चक्षुरादीनि करणान्यादित्याद्यनुगृहीतानि स्व
स्वविषयेषु प्रवर्तन्ते॥ तत्र बुद्धिः करणव्यापारमनुभवति॥ हं चैत
न्योज्ज्वलितो भयात्मकोद्रष्टादृश्याकारं विपरिणमते॥ तज्जा
गरणं भवति॥ तस्य साक्षी हं चैतन्यं॥ जाग्रत्संस्कारत्रयवा
यवासनावासितबुद्धिः॥ पुष्पपुटिकवत्॥ हं चैतन्योज्ज्वलि
तोभयात्मकोद्रष्टादृश्याकारं विपरीणमते॥ तत्स्वप्नं भ
वति॥ यथा चित्रपटः॥ तस्य पृथक्भूतः साक्षी हमे
व॥ जाग्रत्स्वप्नाभावस्था सर्वसंस्कारैः सह बुद्धिः सा
मूला॥ विद्यायां लीना सा विद्या संस्कारमात्रावशिष्टा
तयि विश्राम्य निर्विकल्पानुभवो भूत्वा तिष्ठते स्वयं सा

सुषुप्त्यवस्था ॥ श्रुतिश्च ॥ न कंचन कामं कामयते न कंचन स्व
प्नं पश्यति सुखरूपमेति यो वेत्ति ॥ तस्य त्वं साक्षी स्वरूपः
॥ स्वप्नावस्थात्रय भावाभाव साक्ष्यनुस्यूतं प्रथक् भूतं
चैतन्यं त्वं ॥ अतः कालत्रयावस्थायां सर्वदा भावस्वरूपमित्य
॥१८॥ र्थः ॥ अन्यस्य सत्तामसत्तां स्वयं जानासि स्वसत्तां स्वत एव
18 ॥ प्रमाणं स्वसत्ता ज्ञानाश्रयं विना न संभवति ॥ अतः स्वस
त्ता अनुभवसिद्धा ॥ अतस्तव स्वरूपं सद्रूपं ॥२॥ आनंद
रूपतां प्रदर्शयति ॥ व्यावृत्तेषु इंद्रियेषु स्वविषयाद्द्युतं तत्र ॥१८॥
स मितेषु तत्... त्वयि सुखस्वरूपे विश्रम्य ॥ तानि पुनः सुखस्वरू
पवत्वा । उत्थितानि कोर्थः स्वव्यापारे समर्थानि भवंतीत्यर्थः

॥यथापुटसुगंधवत्॥ अतस्तवस्वरूपमानंद रूपं॥३॥ अद्वितीयत्वं
प्रदर्शयति॥ आब्रह्मादिपिपीलिकांतमनुस्यूतं अंतर्यामि साक्षी एकं
॥अतस्तवस्वरूपमद्वितीयं॥ तथा च श्रुतिः॥ एको देवः सर्वभूते
षु गूढः सर्वव्यापी सर्वभूतांतरात्मा॥ कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्चेति॥ ननु साक्षी सप्रपंचः सद्विती
यकः किं न भवति॥ तच्छृणु॥ मृद्विकारेषु मृदिव॥ सुवर्णविकारे
षु सुवर्णमिव॥ तंतुकार्येषु तंतुरिव॥ चिद्विवर्तेश्चिदेव॥
रज्जुसर्पवत्॥ शुक्तिकारजतवत्॥ अतस्त्वमद्वितीयः॥४
अखंडत्वं प्रदर्शयति॥ सजातीयविजातीयस्वगतभेदर
हितत्वात्॥ एकरसः अखंडस्त्वं सैंधवघनवत्॥ ५॥ अचलत्वंप्र

दर्शयति॥जन्ममृत्युरहितत्वात्॥त्वंअचलः॥६॥अजत्वंचदर्शी
यति॥अनादित्वात्कारणरहितत्वात्॥त्वंअजः॥७॥अक्रिय
य त्वंचदर्शयति॥यथा भ्रामकसत्तासन्निधिमात्रेणजडमयंलो
हंचेष्टते॥तथाहंकारममकारेच्छाप्रयत्नरहितस्य सच्चिदा
नंदस्वरूपस्य तवसत्तासंनिधिमात्रेणदेहेंद्रियप्राणमनोबु
०१५॥ द्धिःसकाशात्सदसत्क्रियाउत्पद्यंते॥अतस्तवस्वरूपमक्रियं॥
तथाच॥आत्मचैतन्यमाश्रित्यदेहेंद्रियमनोधियः॥स्वकी
यार्थेषुवर्तंते सूर्यालोकेजनाइव॥अत्रभगवानाह॥शा ०१९॥
रीरवाङ्मनोभिर्यत्कर्म प्रारभतेनरः॥न्याय्यंवाविपरीतं
वापंचैतेतस्यहेतवः॥सच्चीदानंदाक्रियस्वरूपंतवस

त स्वभावः॥ यथा स्नुत्स्ववत्॥ सवितुः प्रकाशवत्॥८॥ अथ कूट
स्थस्वरूपं दर्शयति॥ कूटस्थमविकारि॥ कूटवत्तिष्ठतीति कूटस्थः
॥ अतस्त्वं कूटस्थः॥९॥ अनंततां दर्शयति॥ अव्यक्तादि पृथि
वी पर्यंतं सर्वतत्वेषु पूर्वं व्यापकं चैतन्यं॥ यथा घटासत्तेः पूर्वं
व्यापकं नभः॥ अतस्त्वं अनंतः॥१०॥ स्वप्रकाशत्वं दर्शयति॥
तवदृश्यमानमिदं सर्वं त्वं न भवसीति तवैवानुभवः॥ सच्चिदा
नंदस्वरूपस्त्वं न भवसि तवैवास्तु अनवद्य॥ अतस्त्वं स्वयं
ज्योतिस्वरूपः॥११॥ ब्रह्मत्वं दर्शयति॥ बृहत्त्वात्॥ ब्रह्म
ग॥ णत्वाच्च ब्रह्मेत्यामनंति चोच्यते॥ तत्त्वं ब्रह्म परं रूपं गी
यते॥ बहुधा श्रुतिः॥ अतस्त्वं ब्रह्म॥१२॥ अतः चित्सदा

८

नंदाद्वितीयमखंडमचलमजमक्रियंकूटस्थमनंतं स्वप्रकाशं ब्रह्म
२०॥ ॥ एतैर्द्विविधविशेषणैर्विशेषितं परंब्रह्म तदेवाहमिति
प्रतिपद्यते ॥ यथा नीलमहदुगंध्युत्पलवदासा ॥ एवं नि
२० त्यशुद्धबुद्धमुक्तमनुप्रवर्तते इति तवैवानुभवो जातः ॥
स्तव अत्र [illegible] श्रुतिप्रमा[illegible]णं ॥ प्रज्ञानघननामधे[illegible]यो भवति ॥ आत्मा वा इ नि
दमेक एवाग्र आसी[illegible]त् ॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः
॥ तत्सृष्ट्वा ॥ तदेवानुप्राविशत् ॥ अंतः प्रविष्टः शास्ता जनानां ॥ अनं
तरमबाह्यं सबाह्याभ्यंतरो ह्यजः ॥ शरीरं शरीरेषु ॥ ज्ञात्वा दे
वं सर्वपाशापहानिः ॥ अत्रायं पुरुषः स्वयंज्योतिर्भवति ॥ यो
यं विज्ञान[illegible]मयः पुरुषः ॥ योयमसंगो ह्ययं पुरुषः ॥ योयम २०॥

विनाशः पुरुषः ॥ प्रसमानंदमयः पुरुषः ॥ सहस्रशीर्षा पुरुषः
॥ योयमन्तरमयः पुरुषः ॥ विज्ञानमानंदं ब्रह्म ॥ प्रज्ञाप्रतिष्ठा
प्रज्ञानं ब्रह्म ॥ सत्यंज्ञानमनंतं ब्रह्म ॥ एकमेवाद्वितीयं ब्रह्म
॥ अयमात्मा ब्रह्म ॥ स्मृतयश्च ॥ क्षेत्रज्ञं चापि मां विद्धि ॥ न वेद्या
रे पुरे देहि ॥ अनादित्वां निर्गुणत्वात ॥ समं सर्वेषु भूतेषु ॥ उत्तमः
पुरुषस्त्वन्यः ॥ न जायते म्रियते वा कदाचित् ॥ नादत्ते कस्यचि
त्पापं ॥ अविभक्तं विभक्तेषु ॥ विद्याविनयसंपन्ने ॥ वासुदेवः
सर्वमिति ॥ उपद्रष्टानुमंता च ॥ सर्वेंद्रियगुणाभासं ॥ आत्मैव
देवताः सर्वाः ॥ एतैरन्यैश्च विशेषणैर्विशेषितं परं ब्रह्मेति त
त्वमसीति स्वानुभवः ॥ ब्रह्माहमस्मीति श्रुतिर्गृहीत्वा श्री

गुरोराज्ञयाएवं वेदवाक्यतः गुरुतः स्वतः त्रिः प्रकारेण ब्रह्माहमस्मी
तिज्ञात्वा समुक्त इति ॥ तथा च श्रुतिः ॥ वेदाहमेतं पुरुषं महांतं ॥
आदित्यवर्णं तमसः परस्तात् ॥ तमेवं विद्वानमृत इह भवति ॥
श्री ॥२४॥ नान्यः पंथा विद्यते यनाय ॥ अहमेतं पुरुषं पुरुषो तमं वेद जाना
मि ॥ महांतं व्यापकं आदित्यवर्णं ज्योतिर्मयं ॥ तमसः प्रकृतेः
परस्तात् ॥ परतरं तनुकं रूपं ॥ पुरुषमेवं विदित्वा मृत्युमतिक्र ५॥
म्य ॥ इति गच्छति अपुनरावर्तनाय ॥ अयनाय गमनाय ॥ आन्यः
पंथा न विद्यते ॥ अयनाय इति श्वासेन लोपः छांदसः ॥ स्मृति
रपि तत्राह ॥ अन्यथा शास्त्रगतिषु कुंठता भवतामिह ॥ भ
वताकृतमज्ञानं न कल्पैर्विनिवर्तते ॥ यावदज्ञानभावस्या

तावद्वैतास्तिभवना॥भेदभावाद्भयं चेतित्वस्मिन्नेवद्रुता
लयं॥ज्ञानं भक्तिश्च वैराग्यं एतदेव न संशयः॥ज्ञानैकं
सहजं प्रेमविवेकेनैव मात्मनः॥तस्मात्साधनांतरं नास्ति
॥आत्मभगवद्वचनं॥यदेवं वेतिपुरुषं प्रकृतिं च गुणैः
सह॥सर्वथा वर्तमानोपि न स भूयोभिजायते॥बहूनां
जन्मनामंते ज्ञानवान्मां प्रपद्यते॥वासुदेवः सर्वमिति समहा
त्मा सुदुर्लभः॥तस्मात्सर्वमहं वासुदेवात्व्यं आव्ययं ज्ञातव्य॥ए
तत्त्वं यन्निश्चमेव संस्थितं नातः परं वेदितव्यं हि किंचित्॥एक
मेवात्मा परं ब्रह्म संसारधर्मविमुक्तस्त्वमिति सिद्धं॥एवं तेन भ
यं प्राप्नोषि॥संसारदुःखान्मुक्तोसीति॥एतत्सर्वं विमृश्य

यथेछसि तथा कुरु॥ अतस्त्वं वेदं किंकरो न भवसि॥ यतः शास्त्र
माह॥ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं॥ यद्वेत्ति तस्य कु
स्तेन भयं तस्य कुत्रचित्॥ आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना
२२॥ ॥ यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत कः॥ अनंतरं पुनर्जन्माभा
वयुक्तः॥ तथापि प्राक्ज्ञानोत्पत्तेः॥ अत्र जन्मनि कृतानां कर्म
णां उत्तरकालभाविनां च॥ यानि चातीतानि अनेकज
न्मकृतानि तेषां च फलदत्वान्नाशो न युक्तः॥ तस्मात्त्रिःप्रकारा
ण्यपि त्रीणि जन्मान्यारभेरन्॥ संहृतानि सर्वाण्यनेकजन्मे
ति॥ अन्यथा कृतविप्रनाशो सर्वत्राऽनवस्था प्रसंगः शास्त्रानर्थ २२॥
क्यं स्यादिति॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमिति

॥ न जन्म नाजायत इत्युक्तं तन्न॥ ज्ञानाग्न्युपसृष्टानि सर्वकर्मबीजानि
दह्यंते नांकुरयंति॥ तथा च श्रुतिः॥ बीज्यान्यग्न्युपदग्धानि न रोहं
ति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति॥ अस्तु
कु तावत्॥ ज्ञानोत्पत्युत्तरकाल[illegible]तानां कर्मणां दाहो ज्ञानेन सहभावित्वात्
॥ न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्कृतानामतीतानामनेककृतानां दा
होयुक्तः तन्न॥ तस्य तावदेव चिरं यावन्न विमोक्ष्य इति॥ इषिकातूण
तूलवत्कर्मेति॥ सर्वाणि कर्माणि भस्मसात्कुरुते तथा॥ भो भगवन्
॥ सर्वाणि भस्मसात्कुरुते तथा इति विशेषणात्॥ तथा वर्तमानजन्मा
रंभकानि न क्षीयंते फलदानाय प्रवृत्तान्येवं सत्यपि ज्ञाने तथा प्रारब्ध
फलानामपि कर्मणां क्षयो न युक्त इति तदसत्॥ यथा तेषां मुक्तेषुवत् प्रव

तफलत्वात्॥ यथापूर्वं लक्ष्यवेधाय मुक्तइषु धनुषो लक्ष्यवेधोत्तरकाले॥ तथा
प्रारब्धवेगक्षयात्॥ एतेनैव निवर्त्तते एवं शरीरारंभककर्म शरीरस्थितिप्रयोज
ने निवृत्तेपि अ संस्कारवेगक्षयात् पूर्ववत् प्रवर्त्तत एव॥ किं बहुनायं
२३ देहयात्रामात्रार्थइच्छा॥ निच्छापरेच्छा प्रापितानि आरोपितानि सुखदुःख
लक्षणान्यारब्धफलान्यनुभवन् अंतःकरणाभासादीनामवभासकः
२३॥ सन् तिष्ठत्येव॥ प्रारब्धकर्मक्षयात् जीवन्मुक्तानां पुनर्जन्माभाव उक्तः
॥१॥ सेण नेश्यू परमार्थबुद्धीः कर्यक्षयं नश्यति चापरोक्षात्॥ प्रार
ब्धनाशात् प्रतिभासनाश एवं कर्मा नश्यति चात्मकर्म॥ कर्मणः माया
मूलत्वात्॥ मायानाशे सर्वकर्म भस्माद्भवेत्॥ ननु स्वेच्छयाकृतानां क २३॥
र्मणां शरीरांतरेणापि भोगो भवतीति चेत्॥ तन्न॥ तस्य कर्मफलोपन

यकर्तृत्वाभिमानोनास्त्येव॥असंगोनहिसज्जते॥एतदिच्छादयोप्यात्म
न्यारोप्यंतेक्षेत्रधर्माः॥सद्दृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि॥ध्या
यतिवलेलायतिवेतिश्रुतेः॥गुणागुणेषुवर्तंतइत्यनुसंधानेनशरी
रयात्रास्थितिः॥अन्यथाशरीरयात्रास्थितिर्नप्रसिध्येत्॥तथाच॥
गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः॥यज्ञायाचरतःकर्मसम
ग्रंप्रविलीयते॥जीवन्मुक्तस्यप्रारब्धक्षयेशरीरपातानंतरंविदेहक
र्मविभागंशृणु॥तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यप
देशात्॥तत्रपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यानि
तिशाट्यायनिश्रुतेः॥नतस्यप्राणाउत्क्रामंतितत्रैवसमविलीयंते॥
किंतु॥प्रारब्धंनिश्चयाद्भुंक्ते॥अन्यानिज्ञानेनदह्यंते॥शरीरेष्वित

रकर्मतद्वेषिद्वियवादिनोः॥अनारब्धस्यहि ज्ञानेन निवृत्तिः क्रियते॥अपिच॥
प्रस्य जिवन्मुक्तस्य प्रारब्धस्य भोगार्थं शरीरधारणे कोदोषः॥यथाउखात
दग्धोरगवत्॥अविद्याकार्यदेहद्वयमस्तीतत्किंकरिष्यति॥स्वामिन्॥कार
णनाशे कार्यमस्तितिलोकेदृश्यते॥यथारज्जुस्वरूपे ज्ञाते सर्पज्ञानं निवर्त
24 तेतथापि भयजनितकंपादिकं वर्त्तते॥यथाहि निल्वयनिवल्मीके मृता
रम। व्ययस्ताशे नैवमेवेदं शरीरं यस्मिन् विद्वछरिरे पतितेस्थिते वामुक्त इति
श्रुतिरपि॥सदैवमुक्त इति॥ब्रह्मैव सन् ब्रह्माप्नोति विमुक्तश्च विमुच्यते
स्वभावस्त्वं नित्यमुक्त एव॥इदानीमपि॥स्वप्नद्रष्टा स्वप्नगतभयेनैव न बद्धः
॥स्वप्नव्यवहारे सर्वस्मिन् मिथ्याभुते निरस्ते सति सत्यस्वरूपं स्वयमेवावशि रम।
ष्यते॥ननु प्रारब्धकर्मक्षयात् शरीरनाशः॥शरीरनाशात् पुनर्जन्माभा
वः सर्वविरोपरहितं शून्यमेव जातं तर्हि नैवाहमिदमुच्यते॥किंच यमा

णाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते॥ असदेव तत्॥ अज्ञानं सत्यस्वरूपमेवावशि
ष्यते॥ तर्हि किमर्थं मार्गीकरणं॥ तदसत्॥ तच्छृणु॥ निर्मुच्यापि हि त्वचं सर्पस्व स्वरूप
न मुंचति॥ नास्यामिति च यो हेतुरितीव वक्तुं न युज्यते॥ किंच॥ अमायां च य
था चंद्रो दृश्यते नार्कयोगतः॥ तथा माज्ञानयोगेन भासते न स्फुटं ततः॥
किंच॥ आमायां च यथा चंद्रो ह्यतिंगत्वान्न दृश्यते॥ दृश्यश्च यात्तं तथाद्वस्तु व्य
वहारो न दृश्यते॥ अथात आदेशो नेति नेति॥ अदीर्घमस्थूलमनण्व
ह्रस्वमिति श्रुतेः॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह॥ यद्वाचा
नभ्युदितं इत्यादि निषेधस्य सिद्धिर्नास्ति सर्वस्य निषेधस्य सावधि
कत्वात्॥ अत एव सत्य स्वरूपं अवशिष्यते॥ यन्निषेधद्वारा संदुक्तं त
त्सर्वं प्रपंचस्य नत्वात्मनः॥ यदात्मा न संदुक्तं भवति तदा वंध्यापुत्रे
ण कार्यं कथं निर्वहति॥ अत एव वेदप्रमाणमात्मनः सत्यमिति॥ स

द्भावे श्रुतिप्रमाणं ॥ सदेव सोमेदमग्र आसीत् ॥ सत्यं ज्ञानमनंतं ब्रह्म
॥ स्मृतिरपि ॥ आविनाशि तु तद्विद्धि येन सर्वमिदं ततमित्यादि
॥ किं च ॥ ब्रह्मसद्भावे प्रमाणापेक्षा नास्ति ॥ स्वतः प्रमाणं ब्रह्म ॥ जाग्र
२५॥ दाद्यवस्थात्रये प्रमाणत्वाव्यभिचारात् कूटस्थनित्यता सिद्धिः ॥
सुषुप्तौ व्यभिचार इति चेत्तन्न ॥ तत्रापि प्रमेयत्वमेव निवारयं २८॥
ति सर्वे लोकाः ॥ कथं ॥ नाहमत्र सुषुप्तौ किंचिदुपलब्धवानिति
प्रमाणत्वं ॥ असिद्धस्य हि वस्तुनः परिच्छित्तौ प्रति प्रमापेक्षा न पा ।
त्वात्मनः ॥ आत्मनश्चेत् प्रमाणापेक्षा न त्वात्मनः ॥ आत्मनश्चेत् प्र
माणापेक्षा असिद्धिः ॥ कस्य प्रमातृत्वं स्यात ॥ यस्य प्रमातृत्वं स

एव बोधात्मेति निश्चीयेत् ॥ अत एव स्वतः सिद्ध एवात्मा न प्रमाणापेक्षा ॥
यदिदं दृश्यजातं तदविद्याकल्पितं ॥ इति तीमात्रं ॥ कूटस्थ नित्यतासिद्धिहा
दात्म[illegible]सत्तासामान्यमनुस्यूतं वर्त्तत एव ॥ नाभावो विद्यते स
तः ॥ अतः सत्स्थूलं कार्यं ॥ असत्सूक्ष्मं कारणं तत्सर्वं चिद्विवर्त
रूपेण ब्रह्मैव भवति ॥ तथा च विस्तारः सर्वभूतस्य विष्णोर्वि
श्वमिदं जगत् ॥ द्रष्टव्यमात्मवत् तस्माद्रज्जुसर्पो यथा बुधैरि
ति ज्ञानं तु कथमेवं बहुधाकारं ॥ तच्छृणु ॥ आनिर्वाच्या महति
मायालक्षणाशक्तिर्यथा नानाभावं नयति ॥ तथा च श्रुतिः ॥ इं
द्रो मायाभिः पुरुरूप ईयते ॥ ननु द्वावेतौ ब्रह्मणो रूपमित्युक्त
बाधास्त्वं द्वैतमिति ॥ ननु वास्तवं ॥ तथा च ॥ यत्र हि द्वैतमिव

भवति यत्र हि तर इतरं पश्यति तदितर ईतरं जिघ्रति ईत्यादि ॥ यत्र त्वस्य स
र्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयात् ॥ नान्योतोस्ति द्रष्टा ।
नान्योतोस्ति श्रोता नान्योतोस्ति विज्ञाता यदयं सर्वमविज्ञाता त
26 द्व्यतिरेकं न विजानीयादिति ॥ एतत्सर्वं अखिलमात्मैव ॥ अतस्त
२६॥ द्ध्यासकं ॥ नित्यशुद्धमुक्तः स्वभावं प्रत्यक्चैतन्यमेवात्मतत्वमि
तिवेदांतविद्वदनुभवश्रुतिः ॥ गुरुप्रसादेन जायमानं ब्रह्मापरो
क्षवृत्तिसाधनेन प्रबुद्धाः ॥ सर्वस्मिन् मिथ्याभूते अप्रमेयस्व
रूपं स्वयमेवावशिष्यते ॥ एवं मायानिद्रायाः प्रबुद्धो जी २६॥
वन्मुक्तः ॥ प्रारब्धकर्मजनितफलं वधितो लोकानुग्रहा
नुपूर्ववत्तिष्ठति ॥ ३ ॥ समाह ॥ ज्ञात्वाप्यसर्पं सर्पोत्थं यथा कंपेन
मुंचति

॥विध्वस्ताखिलमोहोपि मोहं कार्यं तथात्मवित्॥ अस्य जीवन्मुक्तस्य
देहधारणं लोकस्योपकरार्थं इति श्रुतिरपि॥ आह॥ नाछादने स्व
शरीरे नोपभोगार्थाय लोकस्योपकरार्थाय परीग्रहेत॥ भो भगवन्
॥ लोकोपकारः किं॥ उपकरस्त्रिविधः॥ तत्कथं इत्थं॥ दर्शन भजन
संभाषणं चेति॥ दर्शनेन पापक्षयो भवति॥ भजनेन श्रेय उत्तरोत्तरं
वृद्धिः॥ संभाषणेन मोक्षो भवति॥ एवं नित्य शुद्ध बुद्ध मुक्त सत्य
स्वभाव स्वरूपोहं॥ एवंविधो बोधाः॥ आचार्य प्रसादात्॥ अज्ञानात् प्र
बुद्धाः॥ संसार विमुक्तो भवति॥ श्रुतिरपि॥ आचार्यवान् हि पुरुषो
वेद॥ आचार्याद्धैत विद्या विदिता॥ तरति शोकमात्मवित्॥ भिद्यते हृ
दयग्रंथिश्छिद्यन्ते सर्वसंशयः॥ क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे
परावरे॥

सानाग्नीः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ब्रह्मविदाप्नोति परं
॥ ब्रह्म वेद ब्रह्मैव भवति ॥ इदानीं ॥ अन्यउपासने दोषमाह ॥ अन्य
विद्याः क्रियाउपदिशंति कालांतरे अनित्यफलं तां दर्शयति ॥ श्रु
27 तिरपि ॥ सर्वे विद्याः क्रियापराः यदि क्रियाफलं मोक्षो भवे
त ॥ अनित्यत्वं प्रसज्जेत घटवत् ॥ स्वर्गादि वन्नश्येदिति ॥
आमुमेवअर्थं श्रुतिरप्याह ॥ तथेह कर्मजितो लोकः क्षीय
(२७) ॥ ते ॥ एवमुमुत्र पुण्यजितो लोकः क्षीयत इति ॥ स्मृतिरपि ॥
क्षीणे पुण्ये मर्त्यलोके विशंति ॥ अचरणहेतु दुःखफलात् दुःख (२८) ॥
भोगांते पतन्दुःखं ॥ एवमन्यविद्योपासने दुःखमाप्नोति ॥ श्रुति

रपि ॥ मृत्योःस मृत्युमाप्नोति य इह नानेव पश्यति ॥ योन्यदेवता
मुपास्ते स देवानां पशुरिति ॥ अन्योसावहमन्योस्मीत्युपास्ते
योन्यदेवतां ॥ न स वेद नरो ब्रह्म स देवानां यथा पशुरिति ॥ तस्मा
दन्य विद्यां परित्यज्य ॥ इमामध्यात्म विद्यामाश्रयेत् ॥ सा
विद्या किंदृशी ॥ अत्र भगवतोक्तं ॥ राजविद्या राजगुह्यं प
वित्रमिदमुत्तमं ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं
किंच ॥ यथा अग्निहोत्रादिनां स्वर्गादि फलं दर्शयति
श्रुतिः ॥ तथा ब्रह्मविद्या विज्ञानादपि परम पुरुषार्थं
दर्शयति श्रुतिः ॥ ब्रह्मविद्यानंतरं मोक्षं प्रदर्शयंति ॥
॥ मध्ये कार्यांतरं वारयति ॥ ब्रह्मविदाप्नोति परं ॥ इति वेदा

नुशासनं वेदानुशासनमिति॥ अथ शठानां धूर्त्तानां अश्रद्धानां
नास्तिकानां उत्पथगामिनां एतां विद्यां न प्रकाशयेत्॥ यस्य
देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रका
शंते महात्मनः॥ इति श्रुतेः॥ इति श्री सर्वसिद्धांतशास्त्र
२८॥ कि[illegible]॥ श्रीमत्परमहंसपरीव्राजकाचार्य श्रीमच्छंकरकृतौ
बहिरमुखांतः श्रवण अध्यात्मविद्योपदेश विधिः संपूर्णं २८॥
॥ धु॥ धम॥ ५॥ धु॥ धम॥ ५॥
॥ श्रीगजानन॥